# nahuShagItA

# નહુષગીતા

## Document Information

Text title : nahuShagItA

File name : nahuShagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Proofread by : Sunder Hattangadi sunder at hotmail.com

Latest update : January 12, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

nahuShagItA

# નહુષગીતા

॥ અથ નહુષગીતા ॥

---

## અધ્યાય ૧૭૭

વૈશમ્પાયન ઉવાચ ।
યુધિષ્ઠિરસ્તમાસાદ્ય સર્પભોગેન વેષ્ટિતમ્ ।
દયિતં ભ્રાતરં વીરમિદં વચનમબ્રવીત્ ॥ ૧॥

કુન્તીમાતઃ કથમિમામાપદં ત્વમવાપ્તવાન્ ।
કશ્ચાયં પર્વતાભોગપ્રતિમઃ પન્નગોત્તમઃ ॥ ૨॥

સ ધર્મરાજમાલક્ષ્ય ભ્રાતા ભ્રાતરમગ્રજમ્ ।
કથયામાસ તત્સર્વં ગ્રહણાદિ વિચેષ્ટિતમ્ ॥ ૩॥

યુધિષ્ઠિર ઉવાચ ।
દેવો વા યદિ વા દૈત્ય ઉરગો વા ભવાન્યદિ ।
સત્યં સર્પો વચો બ્રૂહિ પૃચ્છતિ ત્વાં યુધિષ્ઠિરઃ ॥ ૪॥

કિમાહૃત્ય વિદિત્વા વા પ્રીતિસ્તે સ્યાદ્ભુજઙ્ગમ ।
કિમાહારં પ્રયચ્છામિ કથં મુઞ્ચેદ્ભવાનિમમ્ ॥ ૫॥

સર્પ ઉવાચ ।
નહુષો નામ રાજાઽહમાસં પૂર્વસ્તવાનઘ ।
પ્રથિતઃ પઞ્ચમઃ સોમાદાયોઃપુત્રો નરાધિપ ॥ ૬॥

ક્રતુભિસ્તપસા ચૈવ સ્વાધ્યાયેન દમેન ચ ।
ત્રૈલોક્યૈશ્વર્યમવ્યગ્રં પ્રાપ્તો વિક્રમણેન ચ ॥ ૭॥

તદૈશ્વર્યં સમાસાદ્ય દર્પો મામગમત્તદા ।

સહસ્રં હિ દ્વિજાતીનામુવાહ શિબિકાં મમ ॥ ૮॥

ઐશ્વર્યમદમત્તોઽહમવમન્ય તતો દ્વિજાન્ ।
ઇમામગસ્ત્યેન દશામાનીતઃ પૃથિવીપતે ॥ ૯॥

ન તુ મામજહાત્પ્રજ્ઞા યાવદદ્યેતિ પાણ્ડવ ।
તસ્યૈવાનુગ્રહાદ્રાજન્નગસ્ત્યસ્ય મહાત્મનઃ ॥ ૧૦॥

ષષ્ઠે કાલે મમાહારઃ પ્રાપ્તોઽયમનુજસ્તવ ।
નાહમેનં વિમોક્ષ્યામિ ન ચાન્યમભિકામયે ॥ ૧૧॥

પ્રશ્નાનુચ્ચારિતાંસ્તુ ત્વં વ્યાહરિષ્યસિ ચેન્મમ ।
અથ પશ્ચાદ્વિમોક્ષ્યામિ ભ્રાતરં તે વૃકોદરમ્ ॥ ૧૨॥

યુધિષ્ઠિર ઉવાચ ।
બ્રૂહિ સર્પ યથાકામં પ્રતિવક્ષ્યામિ તે વચઃ ।
અપિ ચેચ્છક્નુયાં પ્રીતિમાહર્તું તે ભુજઙ્ગમ ॥ ૧૩॥

વેદ્યં યદ્બ્રાહ્મણેનેહ તદ્ભવાન્વેત્તિ કેવલમ્ ।
સર્પરાજ તતઃ શ્રુત્વા પ્રતિવક્ષ્યામિ તે વચઃ ॥ ૧૪॥

સર્પ ઉવાચ ।
બ્રાહ્મણઃ કો ભવેદ્રાજન્વેદ્યં કિં ચ યુધિષ્ઠિર ।
બ્રવીહ્યતિમતિં ત્વાં હિ વાક્યૈરનુમિમીમહે ॥ ૧૫॥

યુધિષ્ઠિર ઉવાચ ।
સત્યં દાનં ક્ષમા શીલમાનૃશંસ્યં દમો ઘૃણા ।
દૃશ્યન્તે યત્ર નાગેન્દ્ર સ બ્રાહ્મણ ઇતિ સ્મૃતઃ ॥ ૧૬॥

વેદ્યં સર્પ પરં બ્રહ્મ નિર્દુઃખમસુખં ચ યત્ ।
યત્ર ગત્વા ન શોચન્તિ ભવતઃ કિં વિવક્ષિતમ્ ॥ ૧૭॥

સર્પ ઉવાચ ।
ચાતુર્વર્ણ્યં પ્રમાણં ચ સત્યં ચ બ્રહ્મ ચૈવ હિ ।
શૂદ્રેષ્વપિ ચ સત્યં ચ દાનમક્રોધ એવ ચ ।
આનૃશંસ્યમહિંસા ચ ઘૃણા ચૈવ યુધિષ્ઠિર ॥ ૧૮॥

વેદ્યં યચ્ચાથ નિર્દુઃખમસુખં ચ નરાધિપ ।
તાભ્યાં હીનં પદં ચાન્યન્ન તદસ્તીતિ લક્ષયે ॥ ૧૯॥

યુધિષ્ઠિર ઉવાચ ।
શૂદ્રે ચૈતદ્ભવેલ્લક્ષ્યં દ્વિજે તચ્ચ ન વિદ્યતે ।
ન વૈ શૂદ્રો ભવેચ્છૂદ્રો બ્રાહ્મણો ન ચ બ્રાહ્મણઃ ॥ ૨૦॥

યત્રૈતલ્લક્ષ્યતેસર્પ વૃત્તં સ બ્રાહ્મણઃ સ્મૃતઃ ।
યત્રૈતન્ન ભવેત્સર્પ તં શૂદ્રમિતિ નિર્દિશેત્ ॥ ૨૧॥

યત્પુનર્ભવતા પ્રોક્તં ન વેદ્યં વિદ્યતેતિ હ ।
તાભ્યાં હીનમતીત્યાત્ર પદં નાસ્તીતિ ચેદપિ ॥ ૨૨॥

એવમેતન્મતં સર્પ તાભ્યાં હીનં ન વિદ્યતે ।
યથા શીતોષ્ણયોર્મધ્યે ભવેન્નોષ્ણં ન શીતતા ॥ ૨૩॥

એવં વૈ સુખદુઃખાભ્યાં હીનમસ્તિ પદં ક્વ ચિત્ ।
એષા મમ મતિઃ સર્પ યથા વા મન્યતે ભવાન્ ॥ ૨૪॥

સર્પ ઉવાચ ।
યદિ તે વૃત્તતો રાજન્બ્રાહ્મણઃ પ્રસમીક્ષિતઃ ।
વ્યર્થા જાતિસ્તદાઽઽયુષ્મન્કૃતિર્યાવન્ન દૃશ્યતે ॥ ૨૫॥

યુધિષ્ઠિર ઉવાચ ।
જાતિરત્ર મહાસર્પ મનુષ્યત્વે મહામતે ।
સઙ્કરાત્સર્વવર્ણાનાં દુષ્પરીક્ષ્યેતિ મે મતિઃ ॥ ૨૬॥

સર્વે સર્વાસ્વપત્યાનિ જનયન્તિ યદા નરાઃ ।
વાઙ્મૈથુનમથો જન્મ મરણં ચ સમં નૃણામ્ ॥ ૨૭॥

ઇદમાર્ષં પ્રમાણં ચ યે યજામહ ઇત્યપિ ।
તસ્માચ્છીલં પ્રધાનેષ્ટં વિદુર્યે તત્ત્વદર્શિનઃ ॥ ૨૮॥

પ્રાઙ્નાભિર્વર્ધનાત્પુંસો જાતકર્મ વિધીયતે ।
તત્રાસ્ય માતા સાવિત્રી પિતા ત્વાચાર્ય ઉચ્યતે ॥ ૨૯॥

વૃત્ત્યા શૂદ્ર સમો હ્યેષ યાવદ્વેદે ન જાયતે ।
અસ્મિન્નેવં મતિદ્વૈધે મનુઃ સ્વાયમ્ભુવોઽબ્રવીત્ ॥ ૩૦॥

કૃતકૃત્યાઃ પુનર્વર્ણા યદિ વૃત્તં ન વિદ્યતે ।
સઙ્કરસ્તત્ર નાગેન્દ્ર બલવાન્પ્રસમીક્ષિતઃ ॥ ૩૧॥

યત્રેદાનીં મહાસર્પ સંસ્કૃતં વૃત્તમિષ્યતે ।

તં બ્રાહ્મણમહં પૂર્વમુક્તવાન્ભુજગોત્તમ ॥ ૩૨॥

સર્પ ઉવાચ ।
શ્રુતં વિદિતવેદ્યસ્ય તવ વાક્યં યુધિષ્ઠિર ।
ભક્ષયેયમહં કસ્માદ્ભ્રાતરં તે વૃકોદરમ્ ॥ ૩૩॥

---

## અધ્યાય ૧૭૮

યુધિષ્ઠિર ઉવાચ ।
ભવાનેતાદૃશો લોકે વેદવેદાઙ્ગપારગઃ ।
બ્રૂહિ કિં કુર્વતઃ કર્મ ભવેદ્ગતિરનુત્તમા ॥ ૧॥

સર્પ ઉવાચ ।
પાત્રે દત્ત્વા પ્રિયાણ્યુક્ત્વા સત્યમુક્ત્વા ચ ભારત ।
અહિંસાનિરતઃ સ્વર્ગં ગચ્છેદિતિ મતિર્મમ ॥ ૨॥

યુધિષ્ઠિર ઉવાચ ।
દાનાદ્વાસર્પોવાચ ।સત્યાદ્વા કિમતો ગુરુ દૃશ્યતે ।
અહિંસા પ્રિયયોશ્ચૈવ ગુરુલાઘવમુચ્યતામ્ ॥ ૩॥

સર્પોવાચ ।
દાને રતત્વં સત્યં ચ અહિંસા પ્રિયમેવ ચ ।
એષાં કાર્યગરીયસ્ત્વાદ્દૃશ્યતે ગુરુલાઘવમ્ ॥ ૪॥

કસ્માચ્ચિદ્દાનયોગાદ્ધિ સત્યમેવ વિશિષ્યતે ।
સત્યવાક્યાચ્ચ રાજેન્દ્ર કિંચિદ્દાનં વિશિષ્યતે ॥ ૫॥

એવમેવ મહેષ્વાસ પ્રિયવાક્યાન્મહીપતે ।
અહિંસા દૃશ્યતે ગુર્વી તતશ્ચ પ્રિયમિષ્યતે ॥ ૬॥

એવમેતદ્ભવેદ્રાજન્કાર્યાપેક્ષમનન્તરમ્ ।
યદભિપ્રેતમન્યત્તે બ્રૂહિ યાવદ્બ્રવીમ્યહમ્ ॥ ૭॥

યુધિષ્ઠિર ઉવાચ ।
કથં સ્વર્ગે ગતિઃ સર્પ કર્મણાં ચ ફલં ધ્રુવમ્ ।
અશરીરસ્ય દૃશ્યેત વિષયાંશ્ચ બ્રવીહિ મે ॥ ૮॥

સર્પ ઉવાચ ।
તિસ્રો વૈ ગતયો રાજન્પરિદૃષ્ટાઃ સ્વકર્મભિઃ ।
માનુષ્યં સ્વર્ગવાસશ્ચ તિર્યગ્યોનિશ્ચ તત્ત્રિધા ॥ ૯॥

તત્ર વૈ માનુષાલ્લોકાદ્દાનાદિભિરતન્દ્રિતઃ ।
અહિંસાર્થસમાયુક્તૈઃ કારણૈઃ સ્વર્ગમશ્નુતે ॥ ૧૦॥

વિપરીતૈશ્ચ રાજેન્દ્ર કારણૈર્માનુષો ભવેત્ ।
તિર્યગ્યોનિસ્તથા તાત વિશેષશ્ચાત્ર વક્ષ્યતે ॥ ૧૧॥

કામક્રોધસમાયુક્તો હિંસા લોભસમન્વિતઃ ।
મનુષ્યત્વાત્પરિભ્રષ્ટસ્તિર્યગ્યોનૌ પ્રસૂયતે ॥ ૧૨॥

તિર્યગ્યોન્યાં પૃથગ્ભાવો મનુષ્યત્વે વિધીયતે ।
ગવાદિભ્યસ્તથાઽશ્વેભ્યો દેવત્વમપિ દૃશ્યતે ॥ ૧૩॥

સોઽયમેતા ગતીઃ સર્વા જન્તુશ્ચરતિ કાર્યવાન્ ।
નિત્યે મહતિ ચાત્માનમવસ્થાપયતે નૃપ ॥ ૧૪॥

જાતો જાતશ્ચ બલવાન્ભુઙ્ક્તે ચાત્મા સ દેહવાન્ ।
ફલાર્થસ્તાત નિષ્પૃક્તઃ પ્રજા લક્ષણભાવનઃ ॥ ૧૫॥

યુધિષ્ઠિર ઉવાચ ।
શબ્દે સ્પર્શે ચ રૂપે ચ તથૈવ રસગન્ધયોઃ ।
તસ્યાધિષ્ઠાનમવ્યગ્રો બ્રૂહિ સર્પ યથાતથમ્ ॥ ૧૬॥

કિં ન ગૃહ્ણાસિ વિષયાન્યુગપત્ત્વં મહામતે ।
એતાવદુચ્યતાં ચોક્તં સર્વં પન્નગસત્તમ ॥ ૧૭॥

સર્પ ઉવાચ ।
યદાત્મદ્રવ્યમાયુષ્મન્દેહસંશ્રયણાન્વિતમ્ ।
કરણાધિષ્ઠિતં ભોગાનુપભુઙ્ક્તે યથાવિધિ ॥ ૧૮॥

જ્ઞાનં ચૈવાત્ર બુદ્ધિશ્ચ મનશ્ચ ભરતર્ષભ ।
તસ્ય ભોગાધિકરણે કરણાનિ નિબોધ મે ॥ ૧૯॥

મનસા તાત પર્યેતિ ક્રમશો વિષયાનિમાન્ ।
વિષયાયતનસ્થેન ભૂતાત્મા ક્ષેત્રનિઃસૃતઃ ॥ ૨૦॥

અત્ર ચાપિ નરવ્યાઘ્ર મનો જન્તોર્વિધીયતે ।

તસ્માદ્યુગપદસ્યાત્ર ગ્રહણં નોપપદ્યતે ॥ ૨૧॥

સ આત્મા પુરુષવ્યાઘ્ર ભ્રુવોરન્તરમાશ્રિતઃ ।
દ્રવ્યેષુ સૃજતે બુદ્ધિં વિવિધેષુ પરાવરામ્ ॥ ૨૨॥

બુદ્ધેરુત્તરકાલં ચ વેદના દૃશ્યતે બુધૈઃ ।
એષ વૈ રાજશાર્દૂલ વિધિઃ ક્ષેત્રજ્ઞભાવનઃ ॥ ૨૩॥

યુધિષ્ઠિર ઉવાચ ।
મનસશ્ચાપિ બુદ્ધેશ્ચ બ્રૂહિ મે લક્ષણં પરમ્ ।
એતદધ્યાત્મવિદુષાં પરં કાર્યં વિધીયતે ॥ ૨૪॥

સર્પ ઉવાચ ।
બુદ્ધિરાત્માનુગા તાત ઉત્પાતેન વિધીયતે ।
તદાશ્રિતા હિ સઞ્જ્ઞૈષા વિધિસ્તસ્યૈષિણી ભવેત્ ॥ ૨૫॥

બુદ્ધેર્ગુણવિધિર્નાસ્તિ મનસ્તુ ગુણવદ્ભવેત્ ।
બુદ્ધિરુત્પદ્યતે કાર્યે મનસ્તૂત્પન્નમેવ હિ ॥ ૨૬॥

એતદ્વિશેષણં તાત મનો બુદ્ધ્યોર્મયેરિતમ્ ।
ત્વમપ્યત્રાભિસમ્બુદ્ધઃ કથં વા મન્યતે ભવાન્ ॥ ૨૭॥

યુધિષ્ઠિર ઉવાચ ।
અહો બુદ્ધિમતાં શ્રેષ્ઠ શુભા બુદ્ધિરિયં તવ ।
વિદિતં વેદિતવ્યં તે કસ્માન્મામનુપૃચ્છસિ ॥ ૨૮॥

સર્વજ્ઞં ત્વાં કથં મોહ આવિશત્સ્વર્ગવાસિનમ્ ।
એવમદ્ભુતકર્માણમિતિ મે સંશયો મહાન્ ॥ ૨૯॥

સર્પ ઉવાચ ।
સુપ્રજ્ઞમપિ ચેચ્છૂરમૃદ્ધિર્મોહયતે નરમ્ ।
વર્તમાનઃ સુખે સર્વો નાવૈતીતિ મતિર્મમ ॥ ૩૦॥

સોઽહમૈશ્વર્યમોહેન મદાવિષ્ટો યુધિષ્ઠિર ।
પતિતઃ પ્રતિસમ્બુદ્ધસ્ત્વાં તુ સમ્બોધયામ્યહમ્ ॥ ૩૧॥

કૃતં કાર્યં મહારાજ ત્વયા મમ પરન્તપ ।
ક્ષીણઃ શાપઃ સુકૃચ્છ્રો મે ત્વયા સમ્ભાષ્ય સાધુના ॥ ૩૨॥

અહં હિ દિવિ દિવ્યેન વિમાનેન ચરન્પુરા ।

અભિમાનેન મત્તઃ સન્કં ચિન્નાન્યમચિન્તયમ્ ॥ ૩૩॥

બ્રહ્મર્ષિદેવગન્ધર્વયક્ષરાક્ષસ કિંનરાઃ ।
કરાન્મમ પ્રયચ્છન્તિ સર્વે ત્રૈલોક્યવાસિનઃ ॥ ૩૪॥

ચક્ષુષા યં પ્રપશ્યામિ પ્રાણિનં પૃથિવીપતે ।
તસ્ય તેજો હરામ્યાશુ તદ્ધિ દૃષ્ટિબલં મમ ॥ ૩૫॥

બ્રહ્મર્ષીણાં સહસ્રં હિ ઉવાહ શિબિકાં મમ ।
સ મામપનયો રાજન્ભ્રંશયામાસ વૈ શ્રિયઃ ॥ ૩૬॥

તત્ર હ્યગસ્ત્યઃ પાદેન વહન્પૃષ્ટો મયા મુનિઃ ।
અદૃષ્ટેન તતોઽસ્મ્યુક્તો ધ્વંસ સર્પેતિ વૈ રુષા ॥ ૩૭॥

તતસ્તસ્માદ્વિમાનાગ્રાત્પ્રચ્યુતશ્ચ્યુત ભૂષણઃ ।
પ્રપતન્બુબુધેઽઽત્માનં વ્યાલી ભૂતમધોમુખમ્ ॥ ૩૮॥

અયાચં તમહં વિપ્રં શાપસ્યાન્તો ભવેદિતિ ।
અજ્ઞાનાત્સમ્પ્રવૃત્તસ્ય ભગવન્ક્ષન્તુમર્હસિ ॥ ૩૯॥

તતઃ સ મામુવાચેદં પ્રપતન્તં કૃપાન્વિતઃ ।
યુધિષ્ઠિરો ધર્મરાજઃ શાપાત્ત્વાં મોક્ષયિષ્યતિ ॥ ૪૦॥

અભિમાનસ્ય ઘોરસ્ય બલસ્ય ચ નરાધિપ ।
ફલે ક્ષીણે મહારાજ ફલં પુણ્યમવાપ્સ્યસિ ॥ ૪૧॥

તતો મે વિસ્મયો જાતસ્તદ્દૃષ્ટ્વા તપસો બલમ્ ।
બ્રહ્મ ચ બ્રાહ્મણત્વં ચ યેન ત્વાહમચૂચુદમ્ ॥ ૪૨॥

સત્યં દમસ્તપોયોગમહિંસા દાનનિત્યતા ।
સાધકાનિ સદા પુંસાં ન જાતિર્ન કુલં નૃપ ॥ ૪૩॥

અરિષ્ટ એષ તે ભ્રાતા ભીમો મુક્તો મહાભુજઃ ।
સ્વસ્તિ તેઽસ્તુ મહારાજ ગમિષ્યામિ દિવં પુનઃ ॥ ૪૪॥

વૈશમ્પાયન ઉવાચ ।
ઇત્યુક્ત્વાઽઽજગરં દેહં ત્યક્ત્વા સ નહુષો નૃપઃ ।
દિવ્યં વપુઃ સમાસ્થાય ગતસ્ત્રિદિવમેવ હ ॥ ૪૫॥

યુધિષ્ઠિરોઽપિ ધર્માત્મા ભ્રાત્રા ભીમેન સઙ્ગતઃ ।
ધૌમ્યેન સહિતઃ શ્રીમાનાશ્રમં પુનરભ્યગાત્ ॥ ૪૬॥

તતો દ્વિજેભ્યઃ સર્વેભ્યઃ સમેતેભ્યો યથાતથમ્ ।
કથયામાસ તત્સર્વં ધર્મરાજો યુધિષ્ઠિરઃ ॥ ૪૭॥

તચ્છ્રુત્વા તે દ્વિજાઃ સર્વે ભ્રાતરશ્ચાસ્ય તે ત્રયઃ ।
આસન્સુવ્રીડિતા રાજન્દ્રૌપદી ચ યશસ્વિની ॥ ૪૮॥

તે તુ સર્વે દ્વિજશ્રેષ્ઠાઃ પાણ્ડવાનાં હિતેપ્સયા ।
મૈવમિત્યબ્રુવન્ભીમં ગર્હયન્તોઽસ્ય સાહસમ્ ॥ ૪૯॥

પાણ્ડવાસ્તુ ભયાન્મુક્તં પ્રેક્ષ્ય ભીમં મહાબલમ્ ।
હર્ષમાહારયાં ચક્રુર્વિજહ્રુશ્ચ મુદા યુતાઃ ॥ ૫૦॥

॥ ઇતિ નહુષગીતા સમાપ્તા ॥

Mahabharata Vanaparva, adhyAya 177-178

Proofread by Sunder Hattangadi

*nahuShagItA*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*